**अयुग्मशर** पु० अयुग्माः पञ्च शरा अस्य । पञ्चवाणे कामदेवे अयुग्मशाणादयोऽप्यत्र । वाणपञ्चकं च पञ्चवाणशब्दे वक्ष्यते।

**अयुज्** त्रि० न युज्यते सजातीयेन, युज-क्विन् न०त० । अयुग्मे (विजोड़) विषमे "अयुजि नयुगरेफतो यकारो युजि नजरगाश्च पुष्पिताग्रा" "अयुग्दान्तं स्त्रीणाम्" गोभि० । "अयुक् अयुग्माक्षरम्" सं०त० रघु० "अयुक्षु तु पितॄन् सर्व्वान्" मनुः । "ववुरयुक्छदगुच्छसुगन्धय": माघः ।

**अयुत** त्रि० न युतः संयुक्तः सम्बद्धो वा । १असंयुक्ते २असम्बद्धे च ३दशसहस्रसंख्यायाम् न०"सूर्य्याब्धिसंख्यया द्वित्रिसागरैरयुताहतैः" सू०सि० । स विज्ञेयः परः धर्म्मो नाज्ञानामुदितोऽयुतैः" मनुः । ४तत्संख्यान्विते च ।

**अयुतनायिन्** पु० अयुतं पुरुषमेधानामयुतं नीतवान् जिभूते णिनि । पुरुवंश्ये महाभौमपुत्रे राजभेदे । "पूरोस्तु-भार्य्या कौशल्यानाम तस्यामथ जज्ञे जनमेजय" इत्युपक्रम्य "महाभौमः खलु प्रासेनजितीमुपयेमे तस्य पुत्रो जज्ञे अयुतनायी यः पुरुषमेधानामयुतमनयत् तेनास्यायुतनायित्वम्" भा० आ०प० ।

**अयुतशस्** अव्य० अयुतमयुतम् वीप्सार्थे कारकात् शस् । अयुतमयुतमित्यर्थे ।

**अयुतसिद्ध** त्रि० युतः पृथग्भूतः सन् सिद्धो न भवति न०त० । कारणकपालादेरपृथग्भूततया सिद्धे १कार्य्यद्रव्ये घटादौ तथाभूते वैशेषिकोक्ते द्रव्याश्रिते २गुणे ३कर्म्मणि च तदेतदयुतसिद्धत्वं कार्य्यद्रव्यगुणकर्म्मणां वेदान्तिभिर्नाङ्गीक्रियते यथा शा०भा० । गुणकर्म्मादीनां कारणद्रव्यात्मकतां व्यवस्थाप्य द्रव्यगुणादेरयुतसिद्धत्वनिरासायोक्तम् 'गुणानां द्रव्याधीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यद्युच्येत तत्पुनरयुतसिद्धत्वमपृथग्देशत्वं वा स्यात् अपृथक्कालत्वं वा अपृथक्स्वभावत्वं वा । सर्व्वथापि नोपपद्यते । अपृथग्देशत्वे तावत् स्वाभ्युपगमो विरुध्येत कथं तन्त्वारब्धो हि पटस्तन्तुदेशोऽभ्युपगम्यते नतु पटदेशः पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्युपगम्यन्ते न तन्तुदेशाः तथाचाहुः । "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति" । तन्तवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभन्ते तन्तुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादि गुणान्तरमारभन्ते इति हि तेऽभ्युपगच्छन्ति । सोऽभ्युपगमो द्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। अथापृथक्कालत्वमयुतसिद्धत्वमुच्येत सव्यदक्षिणयोरपि गोविषाणयोरयुतसिद्धत्वं प्रसज्येत । अथापृथक्स्वभावत्वे त्वयुतसिद्धत्वे न द्रव्यगुणयोरात्मभेदः सम्भवति तस्य तादात्म्येनैव प्रतीयमानत्वात् । युतसिद्धयोः सम्बन्धः संयोगः अयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमो मृषैव। तेषां प्राक्सिद्धस्य कार्य्यात् कारणस्यायुतसिद्धत्वानुपपत्तेः अथान्यतरापेक्ष एवायमभ्युपगमः स्यात् अयुतसिद्धस्य कार्यस्य कारणेन सम्बन्धः समवाय इति" एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य कारणेन सम्बन्धो नोपपद्यते द्वयायत्तत्वात् सम्बन्धस्य । सिद्धं भूत्वा सम्बध्येत इति चेत् प्राक्कारणसम्बन्धात् कार्यस्य सिद्धावभ्युपगम्यमानायाम् युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते इतीदमुक्तं दुरुक्तं स्यात् । यथा चोत्पन्नमात्रस्याक्रियस्य कार्य्यद्रव्यस्य विभुभिराकाशादिद्रव्यान्तरैः सम्बन्धः संयोग एवाभ्युपगम्यते न समवायः एवं कारणद्रव्येणापि सम्बन्धः संयोग एव स्यान्न समवायः । नापि संयोगस्य समवायस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेणास्तित्वे किञ्चित्प्रमाणमस्ति । सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न एकत्वेऽपि स्वरूपबाह्यरूपापेक्षयाऽनेकशब्दप्रत्ययदर्शनात् । यथैकोऽपि सन् देवदत्तो लोके स्वरूपं सम्बन्धिरूपञ्चापेक्ष्यानेकशब्दप्रत्ययभाग्भवति मनुष्यो ब्राह्मणः श्रोत्रियो वदान्यो बालो युवा स्थविरः पिता-पुत्रः पौत्रो भ्राता जामातेति । तथा चैकापि सती रेखा-स्थानान्यत्वेन निवेश्यमानैकदशशतसहस्रादिशब्दप्रत्ययभेदमनुभवति तथा सम्बन्धिनोरेव सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेनेत्युपलब्धिलक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वन्तरस्य । नापि सम्बन्धिविषयत्वे सम्बन्धशब्दप्रत्यययोः सततभावप्रसङ्गः स्वरूपबाह्यरूपापेक्षयेत्युक्तोत्तरत्वात् । तथैवाऽण्वात्ममनसामप्रदेशत्वान्न संयोगः सम्भवति प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगदर्शनात् । कल्पिताः प्रदेशा अण्वात्ममनसां भविष्यन्तीति चेन्न अविद्यमानार्थस्य कल्पनायां सर्व्वार्थसिद्धिप्रसङ्गात् इयानेवाविद्यमानो विरुद्धोऽविरुद्धो वार्थः कल्पनीयो नातोऽधिक इति नियमहेत्वभावात् कल्पनायाश्च स्वायत्तत्वात् प्रभूतत्वसम्भवाच्च । नच वैशेषिकैः कल्पितेभ्यः षड्भ्योऽर्थेभ्योऽभ्यधिकाः शतं सहस्रं वार्थान कल्पयितव्या इति निवारको हेतुरस्ति । तस्माद्यस्मै यस्मै यद्यद्रोचते तत्तत् सिध्येत् । कश्चिद्दयालुः प्राणिनां दुःखबहुलः संसार एवमा भूदिति कल्पयेत् अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत्